# Uttara Gita

# ઉત્તરગીતા

## Document Information

Text title : Uttara-Gita

File name : uttaragiitaa.itx

Category : gItA, giitaa, vyAsa

Location : doc_giitaa

Author : Vyasa

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, PSA Easwaran

Latest update : December 30, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 30, 2022

*sanskritdocuments.org*

# ઉત્તરગીતા

## અથ પ્રથમોऽધ્યાયઃ

(અખણ્ડં સચ્ચિદાનન્દમવાઙ્મનસગોચરમ્ ।
આત્માનમખિલાધારમાશ્રયેऽભીષ્ટસિદ્ધયે ॥)
અર્જુન ઉવાચ -
યદેકં નિષ્કલં બ્રહ્મ વ્યોમાતીતં નિરઞ્જનમ્ ।
અપ્રતર્ક્યમવિજ્ઞેયં વિનાશોત્પત્તિવર્જિતમ્ ॥ ૧॥

કૈવલ્યં કેવલં શાન્તં શુદ્ધમત્યન્તનિર્મલમ્ ।
કારણં યોગનિર્મુક્તં હેતુસાધનવર્જિતમ્ ॥ ૨॥

હૃદયામ્બુજમધ્યસ્થં જ્ઞાનજ્ઞેયસ્વરૂપકમ્ ।
તત્ક્ષણાદેવ મુચ્યેત યજ્જ્ઞાનાદ્બ્રૂહિ કેશવ ॥ ૩॥

શ્રીભગવાનુવાચ -
સાધુ પૃષ્ટં મહાબાહો બુદ્ધિમાનસિ પાણ્ડવ
યન્માં પૃચ્છસિ તત્ત્વાર્થમશેષં પ્રવદામ્યહમ્ ॥ ૪॥

આત્મમન્ત્રસ્ય હંસસ્ય પરસ્પરસમન્વયાત્ ।
યોગેન ગતકામાનાં ભાવના બ્રહ્મ ચક્ષતે ॥ ૫॥

શરીરિણામજસ્યાન્તં હંસત્વં પારદર્શનમ્ ।
હંસો હંસાક્ષરં ચૈતત્કૂટસ્થં યત્તદક્ષરમ્ ।
તદ્વિદ્વાનક્ષરં પ્રાપ્ય જહ્યાન્મરણજન્મની ॥ ૬॥

કાકીમુખં કકારાન્તમુકારશ્ચેતનાકૃતિઃ ।
અકારસ્ય તુ લુપ્તસ્ય કોऽર્થઃ સમ્પ્રતિપદ્યતે ॥ ૭॥

ગચ્છંસ્તિષ્ઠન્સદા કાલં વાયુસ્વીકરણં પરમ્ ।
સર્વકાલપ્રયોગેન સહસ્રાયુર્ભવેન્નરઃ ॥ ૮॥

યાવત્પશ્યેત્ખગાકારં તદાકારં વિચિન્તયેત્ ।
ખમધ્યે કુરુ ચાત્માનમાત્મમધ્યે ચ ખં કુરુ ।
આત્માનં ખમયં કૃત્વા ન કિઞ્ચિદપિ ચિન્તયેત્ ॥ ૯॥

સ્થિરબુદ્ધિરસમ્મૂઢો બ્રહ્મવિદ્બ્રહ્મણિ સ્થિતઃ ।
બહિર્વ્યોમસ્થિતં નિત્યં નાસાગ્રે ચ વ્યવસ્થિતમ્ ।
નિષ્કલં તં વિજાનીયાચ્છ્વાસો યત્ર લયં ગતઃ ॥ ૧૦॥

પુટદ્વયવિનિર્મુક્તો વાયુર્યત્ર વિલીયતે ।
તત્ર સંસ્થં મનઃ કૃત્વા તં ધ્યાયેત્પાર્થ ઈશ્વરમ્ । ૧૧
નિર્મલં તં વિજાનીયાત્ષડૂર્મિરહિતં શિવમ્ ।
પ્રભાશૂન્યં મનઃશૂન્યં બુદ્ધિશૂન્યં નિરામયમ્ । ૧૨
સર્વશૂન્યં નિરાભાસં સમાધિસ્તસ્ય લક્ષણમ્ ।
ત્રિશૂન્યં યો વિજાનીયાત્સ તુ મુચ્યેત બન્ધનાત્ । ૧૩
સ્વયમુચ્ચલિતે દેહે દેહી ન્યસ્તસમાધિના ।
નિશ્ચલં તદ્વિજાનીયાત્સમાધિસ્થસ્ય લક્ષણમ્ । ૧૪
અમાત્રં શબ્દરહિતં સ્વરવ્યઞ્જનવર્જિતમ્ ।
બિન્દુનાદકલાતીતં યસ્તં વેદ સ વેદવિત્ । ૧૫
પ્રાપ્તે જ્ઞાનેન વિજ્ઞાને જ્ઞેયે ચ હૃદિ સંસ્થિતે ।
લબ્ધશાન્તિપદે દેહે ન યોગો નૈવ ધારણા । ૧૬
યો વેદાદૌ સ્વરઃ પ્રોક્તો વેદાન્તે ચ પ્રતિષ્ઠિતઃ ।
તસ્ય પ્રકૃતિલીનસ્ય યઃ પરઃ સ મહેશ્વરઃ । ૧૭
નાવાર્થી ચ ભવેત્તાવદ્યાવત્પારં ન ગચ્છતિ ।
ઉત્તીર્ણે ચ સરિત્પારે નાવયા કિં પ્રયોજનમ્ ॥ ૧૮॥

ગ્રન્થમભ્યસ્ય મેધાવી જ્ઞાનવિજ્ઞાનતત્પરઃ ।
પલાલમિવ ધાન્યાર્થી ત્યજેદ્ગ્રન્થમશેષતઃ ॥ ૧૯॥

ઉલ્કાહસ્તો યથા કશ્ચિદ્દ્રવ્યમાલોક્ય તાં ત્યજેત્ ।
જ્ઞાનેન જ્ઞેયમાલોક્ય પશ્ચાજ્જ્ઞાનં પરિત્યજેત્ ॥ ૨૦॥

યથામૃતેન તૃપ્તસ્ય પયસા કિં પ્રયોજનમ્ ।
એવં તં પરમં જ્ઞાત્વા વેદૈર્નાસ્તિ પ્રયોજનમ્ ॥ ૨૧॥

જ્ઞાનામૃતેન તૃપ્તસ્ય કૃતકૃત્યસ્ય યોગિનઃ ।
ન ચાસ્તિ કિઞ્ચિત્કર્તવ્યમસ્તિ ચેન્ન સ તત્ત્વવિત્ ॥ ૨૨॥

તૈલધારામિવાચ્છિન્નં દીર્ઘઘણ્ટાનિનાદવત્ ।
અવાચ્યં પ્રણવસ્યાગ્રં યસ્તં વેદ સ વેદવિત્ ॥ ૨૩॥

આત્માનમરણિં કૃત્વા પ્રણવં ચોત્તરારણિમ્ ।
ધ્યાનનિર્મથનાભ્યાસાદેવં પશ્યેન્નિગૂઢવત્ ॥ ૨૪॥

તાદૃશં પરમં રૂપં સ્મરેત્પાર્થ હ્યનન્યધીઃ ।
વિધૂમાગ્નિનિભં દેવં પશ્યેદન્ત્યન્તનિર્મલમ્ ॥ ૨૫॥

દૂરસ્થોઽપિ ન દૂરસ્થઃ પિણ્ડસ્થઃ પિણ્ડવર્જિતઃ ।
વિમલઃ સર્વદા દેહી સર્વવ્યાપી નિરઞ્જનઃ ॥ ૨૬॥

કાયસ્થોઽપિ ન કાયસ્થઃ કાયસ્થોઽપિ ન જાયતે ।
કાયસ્થોઽપિ ન ભુઞ્જાનઃ કાયસ્થોઽપિ ન બધ્યતે ॥ ૨૭॥

(કાયસ્થોઽપિ ન લિપ્તઃ સ્યાત્કાયસ્થોઽપિ ન બાધ્યતે ।)
તિલમધ્યે યથા તૈલં ક્ષીરમધ્યે યથા ઘૃતમ્ ।
પુષ્પમધ્યે યથા ગન્ધઃ ફલમધ્યે યથા રસઃ । ૨૮
તથા સર્વગતો દેહી દેહમધ્યે વ્યવસ્થિતઃ ।
મનસ્થો દેશિનાં દેવો મનોમધ્યે વ્યવસ્થિતઃ ।
કાષ્ઠાગ્નિવત્પ્રકાશેત આકાશે વાયુવચ્ચરેત્ ॥ ૨૯॥

મનસ્થં મનમધ્યસ્થં મધ્યસ્થં મનવર્જિતમ્ ।
મનસા મન આલોક્ય સ્વયં સિધ્યન્તિ યોગિનઃ ॥ ૩૦॥

આકાશં માનસં કૃત્વા મનઃ કૃત્વા નિરાસ્પદમ્ ।
નિશ્ચલં તદ્વિજાનીયાત્સમાધિસ્થસ્ય લક્ષણમ્ ॥ ૩૧॥

યોગામૃતરસં પીત્વા વાયુભક્ષઃ સદા સુખી ।
યમમભ્યસ્યતે નિત્યં સમાધિર્મૃત્યુનાશકૃત્ ॥ ૩૨॥

ઊર્ધ્વશૂન્યમધઃશૂન્યં મધ્યશૂન્યં યદાત્મકમ્ ।
સર્વશૂન્યં સ આત્મેતિ સમાધિસ્થસ્ય લક્ષણમ્ ।
શૂન્યભાવિતભાવાત્મા પુણ્યપાપૈઃ પ્રમુચ્યતે ॥ ૩૩॥

અર્જુન ઉવાચ-
અદૃશ્યે ભાવના નાસ્તિ દૃશ્યમેતદ્વિનશ્યતિ ।
અવર્ણમસ્વરં બ્રહ્મ કથં ધ્યાયન્તિ યોગિનઃ ॥ ૩૪॥

શ્રીભગવાનુવાચ-
ઊર્ધ્વપૂર્ણમધઃપૂર્ણં મધ્યપૂર્ણં યદાત્મકમ્ ।
સર્વપૂર્ણં સ આત્મેતિ સમાધિસ્થસ્ય લક્ષણમ્ ॥ ૩૫॥

અર્જુન ઉઅવાચ-
સાલમ્બસ્યાપ્યનિત્યત્વં નિરાલમ્બસ્ય શૂન્યતા ।
ઉભયોરપિ દુષ્ટત્વાત્કથં ધ્યાયન્તિ યોગિનઃ ॥ ૩૬॥

શ્રીભગવાનુવાચ-
હૃદયં નિર્મલં કૃત્વા ચિન્તયિત્વાપ્યનામયમ્ ।
અહમેવ ઇદં સર્વમિતિ પશ્યેત્પરં સુખમ્ ॥ ૩૭॥

અર્જુન ઉવાચ-
અક્ષરાણિ સમાત્રાણિ સર્વે બિન્દુસમાશ્રિતાઃ ।
બિન્દુભિર્ભિદ્યતે નાદઃ સ નાદઃ કેન ભિદ્યતે ॥ ૩૮॥

શ્રીભગવાનુવાચ-
અનાહતસ્ય શબ્દસ્ય તસ્ય શબ્દસ્ય યો ધ્વનિઃ ।
ધ્વનેરન્તર્ગતં જ્યોતિર્જ્યોતિરન્તર્ગતં મનઃ ।
તન્મનો વિલયં યાતિ તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૩૯॥

ૐકારધ્વનિનાદેન વાયોઃ સંહરણાન્તિકમ્ ।
નિરાલમ્બં સમુદ્દિશ્ય યત્ર નાદો લયં ગતઃ ॥ ૪૦॥

અર્જુન ઉવાચ-
ભિન્ને પઞ્ચાત્મકે દેહે ગતે પઞ્ચસુ પઞ્ચધા ।
પ્રાણૈર્વિમુક્તે દેહે તુ ધર્માધર્મૌ ક્વ ગચ્છતઃ ॥ ૪૧॥

શ્રીભગવાનુવાચ-
ધર્માધર્મૌ મનશ્ચૈવ પઞ્ચભૂતાનિ યાનિ ચ ।
ઇન્દ્રિયાણિ ચ પઞ્ચૈવ યાશ્ચાન્યાઃ પઞ્ચ દેવતાઃ ॥ ૪૨॥

તાશ્ચૈવ મનસા સર્વે નિત્યમેવાભિમાનતઃ ।
જીવેન સહ ગચ્છન્તિ યાવત્તત્ત્વં ન વિન્દતિ ॥ ૪૩॥

અર્જુન ઉવાચ-
સ્થાવરં જઙ્ગમં ચૈવ યત્કિઞ્ચિત્સચરાચરમ્ ।
જીવા જીવેન સિધ્યન્તિ સ જીવઃ કેન સિધ્યતિ ॥ ૪૪॥

શ્રીભગવાનુવાચ-
મુખનાસિકયોર્મધ્યે પ્રાણઃ સઞ્ચરતે સદા ।
આકાશઃ પિબતે પ્રાણં સ જીવઃ કેન જીવતિ ॥ ૪૫॥

અર્જુન ઉવાચ-
બ્રહ્માણ્ડવ્યાપિતં વ્યોમ વ્યોમ્ના ચાવેષ્ટિતં જગત્ ।
અન્તર્બહિશ્ચ તદ્વ્યોમ કથં દેવો નિરઞ્જનઃ ॥ ૪૬॥

શ્રીભગવાનુવાચ-
આકાશો હ્યવકાશશ્ચ આકાશવ્યાપિતં ચ યત્ ।
આકાશસ્ય ગુણઃ શબ્દો નિઃશબ્દો બ્રહ્મ ઉચ્યતે ॥ ૪૭॥

અર્જુન ઉવાચ-
દન્તોષ્ઠતાલુજિહ્વાનામાસ્પદં યત્ર દૃશ્યતે ।
અક્ષરત્વં કુતસ્તેષાં ક્ષરત્વં વર્તતે સદા ॥ ૪૮॥

અઘોષમવ્યઞ્જનમસ્વરં ચાપ્યતાલુકણ્ઠોષ્ઠમનાસિકં ચ ।
અરેખજાતં પરમૂષ્મવર્જિતં તદક્ષરં ન ક્ષરતે કથઞ્ચિત્ ॥ ૪૯॥

અર્જુન ઉવાચ-
જ્ઞાત્વા સર્વગતં બ્રહ્મ સર્વભૂતાધિવાસિતમ્ ।
ઇન્દ્રિયાણાં નિરોધેન કથં સિધ્યન્તિ યોગિનઃ ॥ ૫૦॥

શ્રીભગવાનુવાચ-
ઇન્દ્રિયાણાં નિરોધેન દેહે પશ્યન્તિ માનવાઃ ।
દેહે નષ્ટે કુતો બુદ્ધિર્બુદ્ધિનાશે કુતો જ્ઞતા ॥ ૫૧॥

તાવદેવ નિરોધઃ સ્યાદ્યાવત્તત્ત્વં ન વિન્દતિ ।
વિદિતે તુ પરે તત્ત્વે એકમેવાનુપશ્યતિ ॥ ૫૨॥

નવચ્છિદ્રકૃતા દેહાઃ સ્રવન્તિ ગલિકા ઇવ ।
નૈવ બ્રહ્મ ન શુદ્ધં સ્યાત્પુમાન્બ્રહ્મ ન વિન્દતિ ॥ ૫૩॥

અત્યન્તમલિનો દેહો દેહી ચાત્યન્તનિર્મલઃ ।
ઉભયોરન્તરં જ્ઞાત્વા કસ્ય શૌચં વિધીયતે ॥ ૫૪॥

ઇતિ ઉત્તરગીતાયાં પ્રથમોઽધ્યાયઃ ।

## અથ દ્વિતીયોઽધ્યાયઃ

(અરૂઢસ્યારુરુક્ષોશ્ચ સ્વરૂપે પરિકીર્તિતે ।
તત્રારૂઢસ્ય બિમ્બૈક્યં કથં સ્યાદિતિ પૃચ્છતિ ॥)
અર્જુન ઉવાચ-
જ્ઞાત્વા સર્વગતં બ્રહ્મ સર્વજ્ઞં પરમેશ્વરમ્ ।
અહં બ્રહ્મેતિ નિર્દેષ્ટું પ્રમાણં તત્ર કિં ભવેત્ ॥ ૧॥

શ્રીભગવાનુવાચ-
યથા જલં જલે ક્ષિપ્તં ક્ષીરે ક્ષીરં ઘૃતે ઘૃતમ્ ।
અવિશેષો ભવેત્તદ્વજ્જીવાત્મપરમાત્મનોઃ ॥ ૨॥

જીવે પરેણ તાદાત્મ્યં સર્વગં જ્યોતિરીશ્વરમ્ ।
પ્રમાણલક્ષણૈર્જ્ઞેયં સ્વયમેકાગ્રવેદિના ॥ ૩॥

અર્જુન ઉવાચ-
જ્ઞાનાદેવ ભવેજ્જ્ઞેયં વિદિત્વા તત્ક્ષણેન તુ ।
જ્ઞાનમાત્રેણ મુચ્યેત કિં પુનર્યોગધારણા ॥ ૪॥

શ્રીભગવાનુવાચ-
જ્ઞાનેન દીપિતે દેહે બુદ્ધિર્બ્રહ્મસમન્વિતા ।
બ્રહ્મજ્ઞાનાગ્નિના વિદ્વાન્નિર્દહેત્કર્મબન્ધનમ્ ॥ ૫॥

તતઃ પવિત્રં પરમેશ્વરાખ્યમદ્વૈતરૂપં વિમલામ્બરાભમ્ ।
યથોદકે તોયમનુપ્રવિષ્ટં તથાત્મરૂપો નિરુપાધિસંસ્થઃ ॥ ૬॥

આકાશવત્સૂક્ષ્મશરીર આત્મા ન દૃશ્યતે વાયુવદન્તરાત્મા ।
સ બાહ્યમભ્યન્તરનિશ્ચલાત્મા અન્તર્મુખં પશ્યતિ તત્ત્વમૈક્યમ્ ॥ ૭॥

યત્ર યત્ર મૃતો જ્ઞાની યેન કેનાપિ મૃત્યુના ।
યથા સર્વગતં વ્યોમ તત્ર તત્ર લયં ગતઃ ॥ ૮॥

(શરીરવ્યાપિતં વ્યોમ ભુવનાનિ ચતુર્દશ ।
નિશ્ચલો નિર્મલો દેહી સર્વવ્યાપી નિરઞ્જનઃ ॥ ૯॥)
શરીરવ્યાપિ ચૈતન્યં જાગ્રદાદિ પ્રભેદતઃ ।
ન ત્વેકદેશવર્ત્ત્વં અન્વયવ્યતિરેકતઃ ॥ ૯॥

મુહૂર્તમપિ યો ગચ્છેન્નાસાગ્રે મનસા સહ ।
સર્વં તરતિ પાપ્માનં તસ્ય જન્મ શતાર્જિતમ્ ॥ ૧૦॥

દક્ષિણે પિઙ્ગલા નાડી વહ્નિમણ્ડલગોચરા ।
દેવયાનમિતિ જ્ઞેયા પુણ્યકર્માનુસારિણી ॥ ૧૧॥

ઇલા ચ વામનિશ્વાસસોમમણ્ડલગોચરા ।
પિતૃયાનમિતિ જ્ઞેયં વામમાશ્રિત્ય તિષ્ઠતિ ॥ ૧૨॥

ગુદસ્ય પૃષ્ઠભાગેઽસ્મિન્વીણાદણ્ડસ્ય દેહભૃત્ ।
દીર્ઘાસ્થિ મૂર્ધ્નિપર્યન્તં બ્રહ્મદણ્ડીતિ કથ્યતે ॥ ૧૩॥

તસ્યાન્તે સુષિરં સૂક્ષ્મં બ્રહ્મનાડીતિ સૂરિભિઃ ॥ ૧૪॥

ઇલાપિઙ્ગલયોર્મધ્યે સુષુમ્ના સૂક્ષ્મરૂપિણી ।
સર્વં પ્રતિષ્ઠિતં યસ્મિન્સર્વગં સર્વતોમુખમ્ ॥ ૧૫॥

તસ્ય મધ્યગતાઃ સૂર્યસોમાગ્નિપરમેશ્વરાઃ ।
ભૂતલોકા દિશઃ ક્ષેત્રસમુદ્રાઃ પર્વતાઃ શિલાઃ ॥

દ્વીપાશ્ચ નિમ્નગા વેદાઃ શાસ્ત્રવિદ્યાકલાક્ષરાઃ ।
સ્વરમન્ત્રપુરાણાનિ ગુણાશ્ચૈતે ચ સર્વશઃ ॥

બીજં બીજાત્મકાસ્તેષાં ક્ષેત્રજ્ઞાઃ પ્રાણવાયવઃ ।
સુષુમ્નાન્તર્ગતં વિશ્વં તસ્મિન્સર્વં પ્રતિષ્ઠિતમ્ ॥ ૧૬॥

નાનાનાડીપ્રસવકં સર્વભૂતાન્તરાત્મનિ ।
ઊર્ધ્વમૂલમધઃ શાખં વાયુમાર્ગેણ સર્વગમ્ ॥ ૧૭॥

દ્વિસપ્તતિસહસ્રાણિ નાડ્યઃ સ્યુર્વાયુગોચરાઃ ।
કર્મમાર્ગેણ સુષિરાસ્તિર્યઞ્ચઃ સુષિરાત્મકાઃ ॥ ૧૮॥

અધશ્ચોર્ધ્વગતાસ્તાસુ નવદ્વારાણિ શોધયન્ ।
વાયુના સહ જીવોર્ધ્વજ્ઞાની મોક્ષમવાપ્નુયાત્ ॥ ૧૯॥

અમરાવતીન્દ્રલોકોઽસ્મિન્નાસાગ્રે પૂર્વતો દિશિ ।
અગ્નિલોકો હૃદિ જ્ઞેયશ્ચક્ષુસ્તેજોવતી પુરી ॥ ૨૦॥

યામ્યા સંયમની શ્રોત્રે યમલોકઃ પ્રતિષ્ઠિતઃ ।
નૈરૃતો હ્યથ તત્પાર્શ્વે નૈરૃતો લોક આશ્રિતઃ ॥ ૨૧॥

વિભાવરી પ્રતીચ્યાં તુ પૃષ્ઠે વારુણિકા પુરી ।
વાયોર્ગન્ધવતી કર્ણપાર્શ્વે લોકઃ પ્રતિષ્ઠિતઃ ॥ ૨૨॥

સૌમ્યા પુષ્પવતી સૌમ્યે સોમલોકસ્તુ કણ્ઠતઃ ।
વામકર્ણે તુ વિજ્ઞેયો દેહમાશ્રિત્ય તિષ્ઠતિ ॥ ૨૩॥

વામે ચક્ષુષિ ચૈશાની શિવલોકો મનોન્મની ।
મૂર્ધ્નિ બ્રહ્મપુરી જ્ઞેયા બ્રહ્માણ્ડં દેહમાશ્રિતમ્ ॥ ૨૪॥

પાદાદધઃ શિવોઽનન્તઃ કાલાગ્નિપ્રલયાત્મકઃ ।
અનામયમધશ્ચોર્ધ્વં મધ્યમં તુ બહિઃ શિવમ્ ॥ ૨૫॥

અધઃ પદોઽતલં વિદ્યાત્પાદં ચ વિતલં વિદુઃ ।
નિતલં પાદસન્ધિશ્ચ સુતલં જઙ્ઘમુચ્યતે ॥ ૨૬॥

મહાતલં તુ જાનુ સ્યાદૂરુદેશો રસાતલમ્ ।
કટિસ્તાલતલં પ્રોક્તં સપ્ત પાતાલસંજ્ઞયા ॥ ૨૭॥

કાલાગ્નિનરકં ઘોરં મહાપાતાલસંજ્ઞયા ।
પાતાલં નાભ્યધોભાગો ભોગીન્દ્રફણિમણ્ડલમ્ ।
વેષ્ટિતઃ સર્વતોઽનન્તઃ સ બિભ્રજ્જીવસંજ્ઞકઃ ॥ ૨૮॥

ભૂલોકં નાભિદેશં તુ ભુવર્લોકં તુ કુક્ષિતઃ ।
હૃદયં સ્વર્ગલોકં તુ સૂર્યાદિગ્રહતારકાઃ ॥ ૨૯॥

સૂર્યસોમસુનક્ષત્રં બુધશુક્રકુજાઙ્ગિરાઃ ।
મન્દશ્ચ સપ્તમો હ્યેષ ધ્રુવોઽતઃ સ્વર્ગલોકતઃ ।
હૃદયે કલ્પયન્યોગી તસ્મિન્સર્વસુખં લભેત્ ॥ ૩૦॥

હૃદયસ્ય મહર્લોકં જનોલોકં તુ કણ્ઠતઃ ।
તપોલોકં ભ્રુવોર્મધ્યે મૂર્ધ્નિ સત્યં પ્રતિષ્ઠિતમ્ ॥ ૩૧॥

બ્રહ્માણ્ડરૂપિણી પૃથ્વી તોયમધ્યે વિલીયતે ।
અગ્નિના પચ્યતે તોયં વાયુના ગ્રસ્યતેઽનલઃ ॥ ૩૨॥

આકાશં તુ પિબેદ્વાયું મનશ્ચાકાશમેવ ચ ।
બુદ્ધ્યહઙ્કારચિત્તં ચ ક્ષેત્રજ્ઞઃ પરમાત્મનિ ॥ ૩૩॥

અહં બ્રહ્મેતિ માં ધ્યાયેદેકાગ્રમનસા સકૃત્ ।
સર્વં તરતિ પાપ્માનં કલ્પકોટિશતૈઃ કૃતમ્ ॥ ૩૪॥

ઘટસંવૃતમાકાશં નીયમાને ઘટે યથા ।

ઘટો નશ્યતિ નાકાશં તદ્વજ્જીવ ઇહાત્મનિ ॥ ૩૫॥

ઘટાકાશમિવાત્માનં વિલયં વેત્તિ તત્ત્વતઃ ।
સ ગચ્છતિ નિરાલમ્બં જ્ઞાનાલોક્યં ન સંશયઃ ॥ ૩૬॥

તપેદ્વર્ષસહસ્રાણિ એકપાદસ્થિતો નરઃ ।
એકસ્ય ધ્યાનયોગસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥

આલોડ્ય ચતુરો વેદાન્ધર્મશાસ્ત્રાણિ સર્વદા ।
યો વૈ બ્રહ્મ ન જાનાતિ દર્વી પાકરસં યથા ॥

યથા ખરશ્ચન્દનભારવાહી
 સારસ્ય વાહી ન તુ ચન્દનસ્ય ।
એવં હિ શાસ્ત્રાણિ બહૂન્યધીત્ય
 સારં ત્વજાનન્ખરવદ્વહેત્સઃ ॥ ૩૭॥

અનન્તકર્મ શૌચં ચ જપો યજ્ઞસ્તથૈવ ચ ।
તીર્થયાત્રાદિગમનં યાવત્તત્ત્વં ન વિન્દતિ ॥ ૩૮॥

સ્વયમુચ્ચલિતે દેહે અહં બ્રહ્માત્ર સંશયી ।
ચતુર્વેદધરો વિપ્રઃ સૂક્ષ્મં બ્રહ્મ ન વિન્દતિ ॥ ૩૯॥

ગવામનેકવર્ણાનાં ક્ષીરં સ્યાદેકવર્ણકમ્ ।
ક્ષીરવદ્દૃશ્યતે જ્ઞાનં દેહિનાં ચ ગવાં યથા ॥ ૪૦॥

આહારનિદ્રાભયમૈથુનં ચ સમાનમેતત્ પશુભિર્નરાણામ્ ।
જ્ઞાનં નરાણામધિકં વિશેષો જ્ઞાનેન હીનાઃ પશુભિઃ સમાનાઃ ॥ ૪૧॥

પ્રાતરમુત્ર પુરીષાભ્યાં મધ્યાહ્ને ક્ષુત્પિપાસયા ।
તૃપ્તાઃ કામેન વર્ધન્તે ચાન્તે વા નિશિ નિદ્રયા ॥ ૪૨॥

નાદબિન્દુસહસ્રાણિ જીવકોટિશતાનિ ચ ।
સર્વં ચ ભસ્મનિર્ધૂતં યત્ર દેવો નિરઞ્જનઃ ॥ ૪૩॥

અહં બ્રહ્મેતિ નિયતો મોક્ષહેતુર્મહાત્મનામ્ ॥ ૪૪॥

દ્વે પદે બન્ધમોક્ષાય ન મમેતિ મમેતિ ચ ।
મમેતિ બધ્યતે જન્તુર્ન મમેતિ વિમુચ્યતે ॥ ૪૫॥

મનસો હ્યુન્મનીભાવાદ્દ્વૈતં નૈવોપલભ્યતે ।
યદા યાત્યુન્મનીભાવં તદા તત્પરમં પદમ્ ॥ ૪૬॥

હન્યાન્મુષ્ટિભિરાકાશં ક્ષુધાર્તઃ ખણ્ડયેત્તુષમ્ ।
નાહં બ્રહ્મેતિ જાનાતિ તસ્ય મુક્તિર્ન જાયતે ॥ ૪૭॥

ઇતિ ઉત્તરગીતાયાં દ્વિતીયોઽધ્યાયઃ ॥

## તૃતીયોઽધ્યાયઃ

(યોગી વ્યર્થક્રિયાલાપપરિત્યાગેન શાન્તધીઃ ।
તૃતીયે શરણં યાયાદ્ધરિમેવેતિ કીર્ત્યતે ॥)
શ્રીભગવાનુવાચ-
અનન્તશાસ્ત્રં બહુવેદિતવ્યમલ્પશ્ચ કાલો બહવશ્ચ વિઘ્નાઃ ।
યત્સારભૂતં તદુપાસિતવ્યં હંસો યથા ક્ષીરમિવામ્બુમિશ્રમ્ ॥ ૧॥

પુરાણં ભારતં વેદશાસ્ત્રાણિ વિવિધાનિ ચ ।
પુત્રદારાદિસંસારો યોગાભ્યાસસ્ય વિઘ્નકૃત્ ॥ ૨॥

ઇદં જ્ઞાનમિદં જ્ઞેયં યઃ સર્વં જ્ઞાતુમિચ્છતિ ।
અપિ વર્ષસહસ્રાયુઃ શાસ્ત્રાન્તં નાધિગચ્છતિ ॥ ૩॥

વિજ્ઞેયોઽક્ષરતન્માત્રં જીવિતં ચાપિ ચઞ્ચલમ્ ।
વિહાય શાસ્ત્રજાલાનિ યત્સત્યં તદુપાસ્યતામ્ ॥ ૪॥

પૃથિવ્યાં યાનિ ભૂતાનિ જિહ્વોપસ્થનિમિત્તિકમ્ ।
જિહ્વોપસ્થપરિત્યાગે પૃથિવ્યાં કિં પ્રયોજનમ્ ॥ ૫॥

તીર્થાનિ તોયપૂર્ણાનિ દેવાન્પાષાણમૃણ્મયાન્ ।
યોગિનો ન પ્રપદ્યન્તે આત્મધ્યાનપરાયણાઃ ॥ ૬॥

અગ્નિર્દેવો દ્વિજાતીનાં મુનીનાં હૃદિ દૈવતમ્ ।
પ્રતિમા સ્વલ્પબુદ્ધીનાં સર્વત્ર સમદર્શિનામ્ ॥ ૭॥

સર્વત્રાવસ્થિતં શાન્તં ન પ્રપશ્યેજ્જનાર્દનમ્ ।
જ્ઞાનચક્ષુર્વિહીનત્વાદન્ધઃ સૂર્યમિવોદિતમ્ ॥ ૮॥

યત્ર યત્ર મનો યાતિ તત્ર તત્ર પરં પદમ્ ।
તત્ર તત્ર પરં બ્રહ્મ સર્વત્ર સમવસ્થિતમ્ ॥ ૯॥

દૃશ્યન્તે દૃશિ રૂપાણિ ગગનં ભાતિ નિર્મલમ્ ।

અહમિત્યક્ષરં બ્રહ્મ પરમં વિષ્ણુમવ્યયમ્ ॥ ૧૦॥

અહમેકમિદં સર્વં ઇતિ પશ્યેત્ પરં સુખમ્ ।
દૃશ્યતે તત્ખગાકારં ખગાકારં વિચિન્તયેત્ ॥

સકલં નિષ્કલં સૂક્ષ્મં મોક્ષદ્વારેણ નિર્ગતમ્ ।
અપવર્ગસ્ય નિર્વાણં પરમં વિષ્ણુમવ્યયમ્ ॥

સર્વતો જ્યોતિરાકાશં સર્વભૂતાધિવાસિનમ્ ।
સર્વત્ર પરમાત્માનં બ્રહ્માત્મા પરમાત્મનામ્ ॥ ૧૧॥

અહં બ્રહ્મેતિ યઃ સર્વં વિજાનાતિ નરઃ સદા ।
હન્યાત્સ્વયમિમાન્કામાન્સર્વાશી સર્વવિક્રયી ॥ ૧૨॥

નિમિષં નિમિષાર્ધં વા યત્ર તિષ્ઠન્તિ યોગિનઃ ।
તત્ર તત્ર કુરુક્ષેત્રં પ્રયાગો નૈમિષં વનમ્ ॥

નિમિષં નિમિષાર્ધં વા પ્રાણિનોઽધ્યાત્મચિન્તકાઃ ।
ક્રતુકોટિસહસ્રાણાં ધ્યાનમેકં વિશિષ્યતે ॥ ૧૩॥

બ્રહ્મજ્ઞાનાન્નાન્યદસ્તિ નિર્દહેત્ પુણ્યપાપકે ।
મિત્રામિત્રે સુખં દુઃખં ઇષ્ટાનિષ્ટે શુભાશુભે ।
એવં માનાપમાને ચ તથા નિન્દાપ્રશંસને ॥ ૧૪॥

શતચ્છિદ્રાન્વિતા કન્થા શીતાશીતનિવારણા ।
અચલા કેશવે ભક્તિર્વિભવૈઃ કિં પ્રયોજનમ્ ॥ ૧૫॥

ભિક્ષાન્નં દેહરક્ષાર્થં વસ્ત્રં શીતનિવારણમ્ ।
અશ્માનં ચ હિરણ્યં ચ શાકં શાલ્યોદનં તથા ।
સમાનં ચિન્તયેદ્યોગી યદિ ચિન્ત્યમપેક્ષતે ॥ ૧૬॥

ભૂતવસ્તુન્યશોચિત્વે પુનર્જન્મ ન વિદ્યતે ॥ ૧૭॥

(આત્મયોગમવોચદ્યો ભક્તિયોગશિરોમણિમ્ ।
તં વન્દે પરમાનન્દં નન્દનન્દનમીશ્વરમ્ ॥)

ઇતિ ઉત્તરગીતાયાં તૃતીયોઽધ્યાયઃ ॥

ઇતિ ઉત્તરગીતા સમાપ્તા ।

Encoded by Sunder Hattangadi

Proofread by Sunder Hattangadi, PSA Easwaran

*Uttara Gita*

pdf was typeset on December 30, 2022

Please send corrections to *sanskrit@cheerful.com*